অভিসরণ / ABHISARON
A Multilingual International Peer-Reviewed Research Journal
Volume 1, Issue II, July 2026, PP. 267-278
www.abhisaron.com
ISSN-3139-4027(Online)
DOI - https://dx.doi.org/10.67757/abhisaron.2026.v1i2.037

# Manusaṃhitāyāṃ varṇitā prācīnā bhāratīyā svāyattāsānavyavasthā sthānīyapraśānanāñca / मनुसंहितायां वर्णिता प्राचीना भारतीया स्वायत्तशासनव्यवस्था स्थानीयप्रशासनञ्च

Sujay Biswas
Research Scholar, Dept. of Jainadarshan
Shri Lal Bahadur Shastri National Sanskrit University, New Delhi
Email: biswassujay2017@gmail.com

Accepted: 07.07.2026
Published: 20.07.2026

**Keywords:**

'मनुस्मृतिः', प्राचीनभारतीयं राज्यविज्ञानम्, मनुसंहितायां, प्रशासकीय-स्तरविन्यासः, न्यायव्यवस्थायाः विकेन्द्रीकरणम्

**Abstract:**

'मनुस्मृतिः' प्राचीन-भारतस्य राज्यशास्त्रस्य शासनव्यवस्थायाः एकः मौलिकः प्रमाणभूतः ग्रन्थः अस्ति। एषः ग्रन्थः स्थानीय-स्वायत्तशासनस्य, प्रशासनिक-विकेन्द्रीकरणस्य तथा न्यायव्यवस्थायाः व्यवस्थितं विश्लेषणं प्रदाति। मनुना राजशक्तेः एककेन्द्रीकरणस्य स्थाने विकेन्द्रीकरणस्योपरि बलं दत्तम्, यत्र ग्रामतः आरभ्य सहस्रग्रामपर्यन्तं स्तरबद्धं प्रशासनं वर्णितम्। एषा व्यवस्था आधुनिक-पञ्चायती-राज-प्रणाल्याः वैचारिक-मूलम् इति विदुषां मतम्। अस्याः शासनपद्धतेः मुख्य-वैशिष्ट्येषु 'ग्रामिक-दशपति-सहस्रपति'-इत्यादीनां पदानां सोपानक्रमः प्रमुखः अस्ति। यत् प्रशासनिक-पारदर्शितां सुनिश्चितं करोति। स्थानीय-स्तरे लघु-विवादानां निपटानार्थं न्यायव्यवस्थायाः विकेन्द्रीकरणं राजस्व-व्यवस्थापनं तथा भ्रष्टाचार-निरोधार्थं गुप्त-निरीक्षणस्य व्यवस्था अत्यन्तं वैज्ञानिकी अस्ति। आधुनिक-भारतीय-संविधानस्य अनुच्छेद-४० (ग्राम-पञ्चायत-गठन) तथा अनुच्छेद-५० (कार्यपालिका-न्यायपालिका-पृथक्करण) इत्येतयोः सह मनुस्मृतेः शासन-तन्त्रस्य ऐतिहासिकं साम्यं स्पष्टतया परिलक्ष्यते।

**Discussion:**

प्राचीनभारतीयं राज्यविज्ञानम् यत् परम्परया दण्डनीतिः नीतिशास्त्रम् वा राजधर्मः इति नाम्ना समधिकं प्रसिद्धम् अस्ति। तस्य मूलदर्शनं केवलं राजकेन्द्रिकाधिपत्ये वा शक्तेः एकाकिनि विस्तारे सीमितं नासीत्। अपितु तस्य वास्तविकं लक्ष्यं सुशासितशक्तेः विकेन्द्रीकरणं प्रान्त्यस्तरे च स्वायत्तशासनस्य प्रतिष्ठापनम् आसीत्। प्राचीनभारतस्य समाजपरिकल्पनायां राज्यम् एकं जैविकं सत्त्वम् इति मन्यते स्म। यत्र प्रत्येकस्याङ्गस्य स्वकीयमुत्कर्षं महत्त्वञ्चासीत्। भारतीयायां ज्ञानपरम्परायां श्रुतेः अर्थात् वेदस्य अनन्तरमेव स्मृतेः स्थानं सर्वजनविदितम् अस्ति। एतासु स्मृतिषु च महर्षिमनुप्रणीता 'मनुसंहिता' अथवा 'मानवधर्मशास्त्रम्' प्राचीनतमा सर्वप्रामाणिकी मौलिकाकरा च परिगण्यते। उत्तरकालिकाः प्रायः सर्वे नीतिग्रन्थाः राज्यविधिसंहिताश्च मनुसंहितामेव मूलस्रोतः प्रेरणात्वेन च जगृहुः। अस्य शास्त्रस्य अप्रतिहतं श्रेष्ठत्वं प्रामाण्यञ्च प्रतिपादयितुम् उत्तरकालिकाः महर्षयः पण्डिताश्च स्पष्टं व्याजहुः यत् मनुमतेन सह यस्य मतस्य विरोधो दृश्यते तत् शास्त्रं समाजे न शस्यते न वा ग्राह्यं भवति। अस्मिन् प्रसङ्गे महर्षिवेदव्यासस्य एकम् उत्तमं वचनं सम्भृतम् अस्ति, यत्र तेनोक्तम् -

**श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते।**
**तत्र श्रौतं प्रमाणं तु तयोर्द्वैधे स्मृतिर्वर।**
**मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते॥** [1]

अर्थात् श्रुति-स्मृति-पुराणानां मध्ये यत्र विरोधः प्रादुर्भवति तत्र श्रुतिरेव परमं प्रमाणम् परन्तु द्वयोः स्मृत्योः मध्ये विरोधे सति मनुस्मृतिरेव श्रेष्ठा। यतो हि या स्मृतिः विधानं वा मनोः अभिप्रायस्य विपरीतं वदति, सा शास्त्रीयसमाजे कदापि प्रशंसिता आदरणीया व न भवति। एवमेव आचार्यबृहस्पतिरपि स्वकीयस्मृतिग्रन्थे मनोः अस्य कालजयिनः उपदेशस्य माहात्म्यं कीर्तयन् अवदत् -

**तावत् शास्त्राणि शोभन्ते तर्कव्याकरणानि च।**
**धर्मार्थमोक्षोपदेष्टा मनुर्यावत् न दृश्यते॥** [2]

अर्थात् समाजे तर्कशास्त्रं व्याकरणम् आदि शास्त्राणि तावदेव शोभन्ते मार्गदर्शकरूपेण वा कार्यं कुवन्ति यावत् धर्म-अर्थ-काम-मोक्षरूपाणां चतसृणां पुरुषार्थानां परमप्रदातुः महर्षिमनोः शास्त्रस्य दर्शनं न प्राप्यते। मनुसंहितायाः सप्तमेऽध्याये राजधर्मस्य राजनीतेश्च मूलभित्तिः अष्टमे नवमे च अध्याये विचार-व्यवहार-सामग्रिकप्रशासनव्यवस्थायाः यादृशं सूक्ष्मं प्राज्ञञ्च रूपरेखा प्रदत्तं तस्य विश्लेषणेन ज्ञायते यत् एषा व्यवस्था वर्तमानकालस्य आधुनिकलोकतान्त्रिकपद्धतेः स्थानीयस्वायत्तशासनस्य 'पञ्चायतीराज' व्यवस्थायाश्च एकं सुदूरप्रसारि आदिमूलम् अस्ति। अस्मिन् अनुसन्धानलेखे मनुसंहितायाः मूलसंस्कृतश्लोकान्

---

1 वेदव्यासवचनम्, स्मृतिचन्द्रिका, संस्कारकाण्डः, पृष्ठम्-१६

2 बृहस्पतिस्मृतिः संस्कारकाण्डः श्लोकः १.१०१

भाष्यकाराणां सूत्राणि सनातनीं शासनतान्त्रिकमर्यादाञ्च आधृत्य प्राचीनभारतस्य स्थानीयप्रशासनस्य एकम् अध्ययनं प्रस्तूयते।

## **२. स्वायत्तशासनस्य दार्शनिकभूमिः राजधर्मश्चः**

मनुसंहितायां राज्यस्य शासनव्यवस्थायाश्च मूलमन्तिमञ्च लक्ष्यं प्रजानां योगक्षेम सम्पादनम् आसीत्। शास्त्रीयपरिभाषायां योग इत्युक्ते अलब्धस्य लाभः क्षेम इत्युक्ते च लब्धस्य सम्यग् रक्षणम्। मनोः राज्यदर्शने एकनायकत्वं निरङ्कुशं शासनं वा सर्वथा वर्जनीयं मन्यते यतो हि तत् प्रजापीडकं त्रुटिपूर्णञ्च भवति। राज्यसञ्चालनं न कस्यापि एकस्य पुरुषस्य बुद्ध्या साध्यम्–एतस्य सत्यस्य प्रतिष्ठापनाय मनुसंहितायां स्पष्टा सचेतना दत्ता अस्ति यत् अविनयी, असंयमी, शास्त्रज्ञानहीनश्च राजा दण्डशक्त्या स्वयमेव विनश्यति। एतमेव सिद्धान्तं दृढीकृत्य महाभारतस्य शान्तिपर्वण्यपि राजधर्मस्य मूलाधारत्वेन शक्तेः विकेन्द्रीकरणमेव प्रतिपादितम् -

**नैक पृथिव्या साध्यं हि राज्यं महदुपेयुषा।**
**सहायान् समुपार्जीत विनीतान् प्रज्ञया सह॥** [3]

अर्थात् महतः साम्राज्यस्य अधिकारिणः कस्यापि राज्ञः कृते एकाकिना राज्यसञ्चालनं सर्वथा असम्भवम् अतः तेन स्वप्रज्ञया विनयगुणेन च युक्तान् योग्यान् सहायकान् अमात्यान् सङ्घटय्य कार्यं करणीयम्। महान्तं राजकार्यं सुचारुरूपेण सम्पादयितुं योग्यानां मन्त्रिणाम् अमात्यानां वा परिषदः गठनं राज्ञः परमं कर्तव्यम्। मनुसंहितायाः सप्तमाध्यायस्य चतुःपञ्चाशत्तमे श्लोके एतद् विधानम् इत्थं वर्णितम् अस्ति -

**सचिवान् सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान्।**
**मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्गतान्॥** [4]

अर्थात् राजा स्वेच्छाचारं न कुर्यात् अपितु सः अतीव सावधानतया स्वकीयवंशक्रमागतान् सर्वप्रकारपरीक्षासु उत्तीर्णान्, शास्त्रज्ञानसम्पन्नान् शूरवीरान् अस्त्रशस्त्रादिप्रयोगनिपुणान् कुलीनांश्च सप्त वा अष्टौ वा सचिवान् मन्त्रिणो वा नियुञ्जीत तैः सार्धं सुगभीरमन्त्रणां कृत्वा राज्यं सञ्चालयेत्। आदर्शराज्ञः प्रजापालनरूपं प्रशासनिकं दायित्वं कीदृशं भवेत्, तत् स्पष्टयितुं महर्षिमनुः एकेन अनुपमेन श्लोकेन कृषिभित्तिकं रूपकम् उपमात्वेन प्रयुक्तवान्। सप्तमाध्यायस्य दशोत्तरशततमे श्लोके सः आदिशति -

**यथोध्दरति कण्ठकं काष्ठं क्षेत्रस्य रक्षणात्।**
**तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः॥** [5]

अर्थात् अस्य श्लोकस्य निहितार्थः अतीव गम्भीरः। एकः चतुरः कृषकः यथा स्वकीयधान्यक्षेत्रस्य पूर्णसुरक्षार्थं शस्यवृद्ध्यर्थञ्च क्षेत्रस्थाः अनिष्टकारिकाः आगच्छाः कङ्कराः कण्टकवृक्षाश्च

---

3 महाभारतम् शान्तिपर्व, अध्यायः ८६ श्लोकः २२

4 मनुस्मृतिः अध्यायः७, श्लोकः ५४

5 मनुस्मृतिः अध्यायः-७ श्लोकः ११०

समूलम् उत्पाट्य मुख्यधान्यरोपान् सस्नेहं रक्षति पोषयति च तथैव आदर्शराज्ञः परमं प्रधानञ्च कर्तव्यं यत् सः राज्यात् दस्यून्, चौरान्, समाजविरोधिनः ठगप्रवृत्तीन् भ्रष्टाचारिणः राजकर्मचारिणश्च समूलम् उन्मूलयेत् अनेन च साधूनां शान्तप्रकृतीनां निष्पापानां च प्रजानां स्वायत्तशासनं स्वतन्त्रा जीविका, दैनन्दिनी सुरक्षा च सुनिश्चिता भवेत्। एतादृशं सुरक्षायोगं राज्यस्य प्रान्तसीमापर्यन्तं प्रापयितुमेव मनुना स्तरविभक्तायाः ग्रामीणस्वायत्तशासनव्यवस्थायाः नियमः दत्तः।

**३. स्थानीयस्वायत्तशासनस्य स्तरायनं प्रशासनिकश्रेणीविभागश्च:**

एकस्य बृहतः विस्तृतस्य च साम्राज्यस्य सुचारु, निष्कण्टकं, सुशृङ्खलञ्च सञ्चालनं विधातुं महर्षिमनुः एकं वैज्ञानिकं, विकेन्द्रीकृतं, सुसङ्ठितञ्च भौगोलिक-प्रशासनिकं ढाञ्चं (structure) निर्मितवान्। अस्याः शासनसंरचनायाः मुख्यं वैशिष्ट्यम् आसीत् अस्याः अधोमुखी स्तरविन्यासः, यत्र प्रशासनस्य निम्नतमः मौलिकश्च एककः (unit) 'ग्रामः' आसीत्। मनुसंहितायाः सप्तमाध्यायस्य पञ्चदशोत्तरशततमात् श्लोकात् सप्तदशोत्तरशततमं श्लोकं यावत् एषः सुनिपुणः स्तरविन्यासः स्पष्टतया वर्णितः। अस्याः व्यवस्थायाः प्रारम्भं कुर्वन् सः आह -

**ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा।**
**विंशतीशं शतेशं च सहस्रपतिमेव च॥** [6]

अर्थात् राजा प्रशासनिकसौकर्याय प्रत्येकस्य ग्रामस्य कृते एकं ग्रामप्रधानं वा ग्रामिकं। दशानां ग्रामाणां कृते एकं दशपतिं। विंशतेः ग्रामाणां कृते एकं विंशतीशं। शतं ग्रामाणां कृते एकं शतेशम्। एकसहस्रग्रामाणां कृते च एकं सर्वोच्चम् अधिपतं सहस्रपतिं नियुञ्जीत। एषा पदक्रमव्यवस्था अधोनिर्दिष्टरूपेण वर्ण्यते।

**ग्रामिकः (एकग्रामस्य प्रधानः)**

प्रशासनिकसोपानस्य निम्नतमे स्तरे ग्रामिकः अवतिष्ठते स्म। यः एकस्य ग्रामस्य मुख्यः आसीत्। सः ग्रामीणस्वायत्तशासनस्य मूलाधारः प्रजानां समीपस्थः शासकश्च आसीत्। ग्रामस्य आभ्यन्तरीणशान्तिरक्षा दैनन्दिनक्षुद्रविवादानां शमनं ग्रामवासिभ्यः राज्ञः कृते करसङ्ग्रहणं च तस्य प्राथमिकं दायित्वम् आसीत्।

**दशपतिः (दशग्रामाणां प्रधानः)**

ग्रामिकस्य ठीक उपरिष्टात् 'दशपतिः' अथवा दशग्रामपतिः इति अधिकारी आसीत्। सः स्वपरिसरस्थानां दशानां ग्रामाणां शासनं तत्रत्यानां दशानां ग्रामिकाणां कार्याणि च सूक्ष्मेक्षिकया पर्यवेक्षते स्म। ग्रामीणशान्तिव्यवस्थायां सः मध्यस्थरूपेण कार्यं करोति स्म।

**विंशतीशः / विंशतिपालः (विंशतिग्रामाणां प्रधानः)**

तृतीये स्तरे विंशतीशः तिष्ठति स्म, यस्य प्रशासनिकक्षेत्रे विंशतिः ग्रामाः अन्तर्भवन्ति

---

6 मनुस्मृतिः अध्यायः-७ श्लोकः ११५

स्म। सः स्वप्रशासने स्थितानां द्वयोः दशपत्योः कार्याणां समन्वयम् अकरोत्, आंचलिकसुरक्षायाः निरीक्षणञ्च विहितवान्।

**शतेशः / शताध्यक्षः (शतग्रामाणां प्रधानः)**

इतः परम् उच्चतरे पदे शतेशः अथवा शताध्यक्षः प्रतिष्ठितः आसीत्। शतग्रामाणां समूहेन निर्मितस्य एकस्य बृहतः मण्डलस्य राजस्वप्रशासनव्यवस्थायाः सञ्चालनं तस्य मुख्यं कार्यम् आसीत्। आधुनिकयुगस्य मण्डलाधिकारिणा (District Magistrate) सह अस्य पदस्य ऐतिहासिकं सादृश्यं दृश्यते।

**सहस्रपतिः (सहस्रग्रामाणां प्रधानः)**

अस्याः स्थानीयप्रशासनसंरचनायाः सर्वोच्चशिखरे सहस्रपतिः आसीत्। यः एकसहस्रग्रामाणां विशालभूभागस्य प्रधानशासकः आसीत्। तस्य प्रशासनिककेन्द्रम् एकं पुरम् तथा नगरम् उच्यते स्म। सः ग्रामीणप्रशासनस्य नगरप्रशासनस्य च मध्ये सेतुत्वेन स्थित्वा साक्षात् केन्द्रसर्वकाराय राज्ञे वा उत्तरदायी आसीत्।

**४. न्यायव्यवस्थायाः विकेन्द्रीकरणम् आपीलपद्धतिश्च:**

मनुसंहितायां वर्णितायाः स्थानीयस्वायत्तशासनपद्धतेः अन्यतमं श्रेष्ठं प्रगामि च वैशिष्ट्यम् आसीत् न्यायविभागस्य विकेन्द्रीकरणम्। ग्रामीणस्तरे उत्पन्नानां दैनन्दिनापराध-सीमाविवाद-व्यवहारविवादानां निर्णयार्थं दरिद्राणां सामान्यानां च प्रजानां कृते दूरवर्तिनीं राजसभां गत्वा दीर्घकालप्रतीक्षायाः आवश्यकता नासीत्। विचारप्रक्रिया एकां सुनिर्दिष्टां न्यायसोपानपद्धतिम् (Appellate System) अनुसरति स्म। अस्य स्पष्टो निर्देशः मनुसंहितायाः सप्तमाध्यायस्य षोडशोत्तरशततमे सप्तदशोत्तरशततमे च श्लोके सम्यग्रूपेण व्यक्तः अस्ति -

**ग्रामे दोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयम्।**
**शंसेद् ग्रामदशेशाय विंशतीशिने॥** [7]
**विंशतीशस्तु तत्सर्वं शतेषाय प्रवेदयेत्।**
**शंसेद् ग्रामशतेशस्तु सहस्रपतये स्वयम्॥** [8]

अर्थात् एतयोः श्लोकयोः वैधानिकं तात्पर्यम् इदम् अस्ति यत् ग्रामे यदा कदापि कोऽपि सामाजिकविवादः अपराधः नियमलङ्घनजनितो दोषः वा समुत्पद्यते स्म। तदा ग्रामिकः प्रथमतः स्थानीयप्रवृद्धानां साहाय्येन स्वयं महता धैर्येण शनकैः तस्य समाधानं कर्तुं प्रयतते स्म। परन्तु यदि सः विवादः ग्रामिकस्य वैधानिकशक्तेः बहिः भवति स्म तदा सः तस्य वादस्य विवरणं स्वस्य उच्चतमाय अधिकारिणे दशपतये ज्ञापयति स्म। दशपतिरपि यदि तस्य समस्यायाः समाधाने असमर्थो भवति स्म तदा सः विंशतिशाय प्रेषयति स्म। विंशतीशः तद् असमाधाय शताध्यक्षाय ततः परं च सहस्रपतये उपस्थापयति स्म। सहस्रपतिरपि यदा कस्यापि अतीव जटिलायाः सांविधानिक्याः राष्ट्रियायाः धार्मिकायाः वा समस्यायाः सम्मुखीभवति स्म। तदैव सः

7 मनुस्मृतिः अध्यायः७, श्लोकः ११६

8 मनुस्मृतिः अध्यायः ७ श्लोकः ११७

विषयः राजसभायां मुख्यन्यायाधीशस्य समक्षम् अन्तिमनिर्णयार्थं प्रेष्यते स्म। अनया विकेन्द्रीकृतन्यायव्यवस्थया स्थानीयपरम्पराणां देशाचाराणां च आधारेण प्रजाः अतीव शीघ्रं सुलभां, निष्पक्षाञ्च न्यायप्राप्तिं लभन्ते स्म ।

**५. स्वायत्तशासिनी करव्यवस्था कर्मचारिणां पारिश्रमिकञ्च:**

स्थानीयस्वायत्तशासिनः संस्थाः आर्थिकरूपेण स्वावलम्बिन्यः कर्तुं केन्द्रीयराजकोषस्य उपरि च तासाम् वेतनभत्तार्थं निर्भरतां न्यूनीकर्तुं महर्षिमनुः एकाम् अदभ्रुतां विकेन्द्रीकृतां भूमि-राजस्वबण्टननीतिं निरूपितवान्। स्व-स्वस्तरीयाणाम् अधिकारिणां स्वतन्त्रजीविकानिर्वाहाय मनुस्मृतेः सप्तमाध्यायस्य अष्टादशोत्तरशततमे एकोनविंशत्युत्तरशततमे च श्लोके अलङ्घ्यः नियमः प्रदतः -

**यानि राजप्रदेयानि प्रतेयुर्ग्रामवासिभिः।**
**अन्नानीन्धनभक्ष्याणि ग्रामिकस्तानि वाप्नुयात्॥** [9]
**कौलं दशेशो भुञ्जीत विंशतीशः पञ्च कुलम्।**
**ग्रामं ग्रामशतेशस्तु पुरं सहस्रपतिः स्मृतम्॥** [10]

अर्थात् अस्याः आर्थिकव्यवस्थायाः सविस्तरं विवरणम् इत्थं वर्तते -

**प्रथमम् (ग्रामिकस्य वेतनम्)**

निम्नतमे स्तरे स्थिताय ग्रामिकाय तथा ग्रामप्रधानाय पारिश्रमिकरूपेण एष नियम आसीत् यत् ग्रामवासिनः राज्ञे प्रतिदिनं कररूपेण तथा बलिना यानि अन्नानि, पानीयानि फलमूलानि शाकानि इन्धनकाष्ठानि च ददति स्म। राजा तं ग्रामीणं करं स्वयं नगृह्य साक्षात् तस्य ग्रामस्य ग्रामिकाय एव तस्य दैनिकवृत्तित्वेन भोगार्थम् अनुजानाति स्म।

**द्वितीयम् (दशपतेः वेतनम्)**

दशानां ग्रामाणां प्रधानः दशपतिः स्वकीयप्रशासकीयसेवायाः विनिमये राष्ट्रात् एक कुल परिमितां कृषिप्रदां भूमिं पूर्णरूपेण निष्करावस्थायां भोक्तुम् अधिकारी आसीत्। शास्त्रीयपरिभाषायाम् एकं कुलम् इत्युक्ते सा भूमिः या एकयुगलेन बलीवर्दाभ्यां सुखेन कर्षितुं शक्यते अथवा या एकास्य मध्यमपरिवारस्य संवत्सरभरस्य अन्नसंस्थानाय पर्याप्ता भवति।

**तृतीयम् (विंशतीशस्य वेतनम्)**

विंशतिग्रामाणां स्वामी विंशतीशः स्वस्य उच्चतरदायित्वस्य कृते पञ्च कुल परिमितायाः भूमेः उपस्वत्वं वा उत्पादितशस्यानां राजस्वं स्वकीयपारिश्रमिकरूपेण प्राप्नोति स्म।

**चतुर्थम् (शतेशस्य वेतनम्)**

एकशतग्रामाधिपतिः शताध्यक्षः स्वस्य विशालक्षेत्रस्य पर्यवेक्षणाय पारिश्रमिकरूपेण एकं सम्पूर्णं समृद्धं ग्रामं तस्य सर्वप्रकारकरान् शस्यानि राजस्वान् च स्वस्य वैयक्तिकवेतनरूपेण

---

[9] मनुस्मृतिः अध्यायः७ श्लोकः ११८

[10] मनुस्मृतिः अध्यायः ७, श्लोकः ११९

लभते स्म।

**पञ्चमम् (सहस्रपतेः वेतनम्)**

अन्तिमे स्तरे सहस्रग्रामाणां नायकः सहस्रपतिः एकं सम्पूर्णं पुरं नाम वाणिज्यिकं शिल्पप्रधानं वा नगरं तस्य पूर्णराजस्वं स्वस्य तथा स्वस्याधीनस्थानां कर्मचारिणां स्थायीजीविकार्थं वेतनेन सह प्राप्नोति स्म। अनया राजस्वव्यवस्थया स्थानीयः करः स्थानीयप्रशासनेनैव स्थानीयविकासाय संरक्षणाय च व्ययितुं सुगमः अभवत्।

**६. प्रशासनिकनियन्त्रणं भ्रष्टाचारनिवारणनीतिश्च:**

महर्षिमनुः केवलम् एकः तात्त्विको धर्मगुरुः नासीत्, अपितु सः दूरदर्शी यथार्थवादी च समाजविज्ञानी राष्ट्रनीतिज्ञश्च आसीत्। सः अजानात् यत् स्थानीयस्वायत्तशासकाणाम् हस्ते शक्तेः राजस्वस्य च अधिकारे दत्ते सति मनुष्याः स्वभावसुलभलोभवशात् कदाचित् स्वैराचारिणः, अत्याचारिणः भ्रष्टाचारिणः वा भवितुं शक्नुवन्ति। राजशक्तेः अस्य अन्धकारमयस्य पक्षस्य उद्घाटनं कुर्वन् मनुसंहितायाः सप्तमाध्यायस्य त्रयोविंशत्युत्तरशततमे श्लोके स्पष्टं सचेतितम् -

**राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः। भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः॥** [11]

अर्थात् राज्ञा नियुक्ताः रक्षणकाराः प्रशासनिककर्मचारिणश्च प्रायेण परधनलोलुपाः शठाः धूर्ताः प्रबञ्चकाश्च भवन्ति। ते बहुधा प्रजानां सारल्यस्य दुरुपयोगं कृत्वा तासाम् शोषणं पीडनञ्च कर्तुम् उद्यताः भवन्ति। अतः आदर्शराज्ञः प्रधानं कर्तव्यं यत् सः एतादृशानां कर्मचारिणां हस्तात् प्रजानां धन-प्राण-अधिकारान् रक्षेत्। अस्य ग्रामीणप्रशासकवृन्दस्य भ्रष्टाचारनिरोधाय शक्तेः सन्तुलनं (checks and balances) विधातुं मनुना एका सुदृढा त्रिस्तरीया सुरक्षाप्रणाली प्रवर्तिता -

**प्रथमः स्तरः (उपकारकः सचिवः)**

ग्रामीणप्रशासने तीक्ष्णनजरिनियोजनाय राजा स्वकीयमन्त्रिपरिषदा एकं परमविश्वस्तं नीतिपरायणम् अपक्षपातिनं कठोरञ्च केन्द्रीयमन्त्रिणं परिधारक सचिव रूपेण नियुङ्क्ते स्म। यस्य कार्यं सम्पूर्णे राज्ये झटिकाभ्रमणं (surprise visits) कृत्वा ग्रामप्रधानानाम् अन्येषाञ्च ग्रामीणशासकानां सत्यनिष्ठायाः कार्याणाञ्च प्रत्यक्षनिरीक्षणम् आसीत्।

**द्वितीयः स्तरः (नगराधिपतिः / सर्वार्थचिन्तकः)**

प्रत्येकस्मिन् मुख्यनगररे सहस्रपतेः केन्द्रस्थाने वा एकः अतीव प्रभावशाली तेजस्वी उच्चपदस्थः सामरिकाधिकारी सर्वार्थचिन्तकः नियुक्तो भवति स्म। यः सर्वविद्याकुशलो भवति स्म। सः स्वकीयसैन्यबलेन, निगूढैः विश्वस्तैः चरैः तथा गुप्तचरैः च स्थानीयस्वायत्तशासकानां दैनन्दिनक्रियाकलापानां गुप्तसन्धानं गृह्णाति स्म।

**तृतीयः स्तरः (कठोरदण्डः सर्वस्वहरणञ्च)**

---

[11] मनुस्मृतिः अध्यायः ७ श्लोकः १२३

मनोः कठोरा सांविधानिकी आज्ञा आसीत् यत् कोऽपि स्वायत्तशास्यधिकारी कर्मचारी वा यदि स्वपदस्य दुरुपयोगं कृत्वा प्रजाभ्यः अन्यायेन उत्कोचं तथा घूषं गृह्णीयात् अतिरिक्तवृद्ध्या करं गृह्णीयात् प्रजां वा पीडयेत् तदा राजा परमदण्डधररूपेण तस्य विरुद्धं चरमां व्यवस्थाम् आचरेत्। मनुस्मृतौ दण्डस्य अस्य सर्वभौमशासनस्य प्रतिपादनाय उक्तम् -

**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति। दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः॥** [12]

अर्थात् दण्ड एव सर्वाः प्रजाः शासयति, दण्ड एव सर्वाः रक्षति यदा सर्वे शयानाः भवन्ति तदा दण्ड एव जागर्ति अतः पण्डिताः दण्डमेव धर्मस्य वास्तविकं स्वरूपं मन्यन्ते। अतः भ्रष्टाचारिणां दमनाय सप्तमाध्यायस्य चतुर्विंशत्युत्तरशततमे श्लोके कठोरं दण्डं निर्धारयन् मनुः प्राह -

**ये कार्यिकेभ्योऽर्थं गृह्णीयुः पापिष्ठाः सचिवोत्कचाः। तेषां सर्वस्वं राजा हत्वा विवासयेत्॥** [13]

अर्थात् पापिष्ठाः राजकर्मचारिणः सचिवा वा प्रजानां कार्यसाधनाय अन्यायेन अर्थं कमिशनं घूषं वा स्वीकुर्वन्ति राजा तेषां सर्वस्वं - स्थावरजङ्गमादिसम्पत्तिं वाजेआप्तमं कृत्वा तान् सपरिवारात् राज्यात् सर्वदा कृते निर्वासयेत्। एतादृशानां विधानां कठोरपालनेनैव राज्यं निष्कण्टकं भवति राजा च सुखसमृद्धी प्राप्नोति।

**७. मनुस्मृतेः संविधानस्य च विधिकः समन्वयः**

अद्यतनानां राजनैतिकविदुषां विचारानुसारं मनुस्मृतिः केवलं सामाजिकाचारसंहिता नास्ति अपितु एषा प्राचीनभारतस्य प्रमुखा 'सार्वजनिकप्रशासनस्य' (Public Administration) तथा 'विधिशास्त्रस्य' (Jurisprudence) आधाराग्रन्थः आसीत्।

सत्तायाः विकेन्द्रीकरणं स्वायत्तशासनं चः आधुनिकानां राजनैतिकशोधपत्राणां यथा- 'Manu's Vision of Just Administration' अनुसारं मनुस्मृतौ वर्णिता ग्राम-नगरप्रशासनव्यवस्था एव आधुनिकत्रिस्तरीयपञ्चायतीराजव्यवस्थायाः तथा स्थानीयस्वायत्तशासनस्य आदिमं रूपम् अस्ति। कल्याणकारी राज्यं सुशासनं उल्लेखन्ति यत् मनुस्मृतेः राजधर्म अध्यायः आधुनिक-सुशासन (Good Governance) भावनां पोषयति, यत्र शासकस्य मुख्यं कर्तव्यं दुर्बलानां प्रजानीं च रक्षणं वर्तते।

मनुस्मृतेः सप्तमे अध्याये राजधर्मप्रकरणे मुख्यरूपेण प्रशासनिकव्यवस्थायाः तथा जनपद-ग्रामस्तरयोः अधिकारिणां नियुक्तिक्रियायाः सूक्ष्मं विवरणं प्राप्यते प्रशासनिकस्तरविन्यासः पञ्चायतीराजव्यवस्थायाः आदिमं रूपम् अस्मिन् प्रसङ्गे मनुस्मृतेः सप्तमे अध्याये उल्लिखितम् अस्ति -

**ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा।**

---

[12] मनुस्मृतिः अध्यायः-७ श्लोकः१८

[13] मनुस्मृतिः अध्यायः ७ श्लोकः १२४

**विंशतीशं शतेशं च सहस्रपतिमेव च।।** [14]

अर्थात् राजा एकस्य ग्रामस्य कृते एकं ग्रामाधिपतिम् तथा ग्रामप्रधानम्।दशनां ग्रामाणां कृते एकं दशग्रामपतिम्। विंशतेः ग्रामाणां कृते विंशतीशाधिपतिम्। शतानां ग्रामाणां कृते शतेशं तथा शतग्रामपतिम्। तथा सहस्रग्रामाणां कृते एकं सहस्रपतिं च नियुञ्जीत। साक्ष्यदृष्टान्त: एषः श्लोकः एव प्रमाणीकरोति यत् एकः ग्रामः ग्रामपञ्चायत्। दश-विंशतिग्रामाः तथा पञ्चायत्समितिः खण्डः। तथा शत-सहस्रग्रामाः तथा जिलापरिषद्। एतादृशी आधुनिकी प्रशासनिकसंरचना मनोः विचारे पूर्वमेव आसीत् । जनपदसमाहर्ता (District Collector) 'सर्वार्थचिन्तक' पदे नियुक्तं अस्मिन् प्रसङ्गे मनुस्मृतेः सप्तमे अध्याये उल्लिखितम् अस्ति -

**नगरे नगरे चैकं कुर्यात्सर्वार्थचिन्तकम्।**
**उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहम्।।** [15]

अर्थात् राजा प्रत्येकस्मिन् नगरे वा मण्डले सर्वविषयाणां पर्यवेक्षणाय एकम् उच्चपदस्थं प्रभावशाली च अधिकारिणं तथा सर्वार्थचिन्तकं नियुक्तं कुर्यात्, यः नक्षत्राणां मध्ये ग्रह इव तेजस्वी दृश्येत। साक्ष्यदृष्टान्तः आधुनिकप्रशासनव्यवस्थायां एषः सर्वार्थचिन्तकः एव जनपददण्डाधिकारी (District Magistrate/DM) अथवा जनपदसमाहर्ता (District Collector) इति कथ्यते। यः समग्रजनपदस्य शान्ति-व्यवस्थायाः प्रशासनिकसमन्वयस्य च रक्षणं करोति।

भारतीयसंविधाने सम्बद्धाः अनुच्छेदाः (Articles in the Indian Constitution)

भारतीयसंविधानस्य निर्मातारः प्राचीनभारतस्य ग्रामीणस्वायत्तशासनस्य भावनां आधुनिकलोकतन्त्रात्मकस्वरूपं दातुं संविधाने कांश्चन विशिष्टान् अनुच्छेदान् (Articles) सन्निवेशितवन्तः अनुच्छेदः ४० (Article 40) - ग्रामपञ्चायतानां सङ्घटनम् अत्र
भारतसंविधानस्य राज्यनीतेः निर्देशकसिद्धान्तानां (Directive Principles) अन्तर्गत अनुच्छेदे ४० स्पष्टं कथितं यत् - **"राज्यं ग्रामपञ्चायतानां सङ्घटनाय प्रयतते तथा च ताभ्यः तादृशान् अधिकारान् शक्तीः च प्रदास्यति याः तासाम् स्वायत्तशासनस्य एककरूपेण कार्यकरणाय आवश्यकाः स्युः।"** मनुस्मृतौ प्रतिग्रामं स्वतन्त्र-ग्रामिकस्य नियुक्त्याः या मूलभावना आसीत् तस्याः आधुनिकं सांविधानिकं रूपम् एव एषः अनुच्छेदः ४० अस्ति।

**ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा।**
**विंशतीशं शतेशं च सहस्रपतिमेव च।।** [16]

अनुच्छेदः २४३ (Article 243) पञ्चायतीराजव्यवस्था: १९९२ तमे वर्षे ७३ तमेन संविधानसंशोधनेन योजिताः अनुच्छेद २४३ इत्यस्य धाराः (भाग-IX) भारतस्य त्रिस्तरीयायै पञ्चायतीव्यवस्थायै सांविधानिकमान्यतां ददति। मनोः सूक्ष्मात् एककात् ग्रामः आरभ्य उच्चतरप्रशासनिकस्तरं यावत् ग्राम दशग्राम शतग्राम सत्ताविकेन्द्रीकरणस्य सिद्धान्तेन सह अस्य सीधा साङ्गठनिकः मेलः दृश्यते।

---

14 मनुस्मृतिः ७.११५

15 मनुस्मृतिः ७.१२१

16 मनुस्मृतिः ७.११५

अनुच्छेदः ५० (Article 50) कार्यपालिकायाः न्यायपालिकायाः पृथक्करणम्
मनुस्मृतौ शासकाय राज्ञे परामर्शदातुं विचारं कर्तुं च पृथक् सचिवाः तथा ब्राह्मणन्यायाधीशाः उक्ताः सन्ति (८.१)। अस्य शक्तिपृथक्करणस्य आधुनिकं रूपं संविधाने अनुच्छेदः ५० अस्ति, यः न्यायपालिकां कार्यपालिकायाः (Executive) पृथक् स्थापयितुं निर्देशं ददाति। अस्मिन् प्रसङ्गे मनुस्मृतेः सप्तमे अध्याये उल्लिखितम् अस्ति -

**सचिवान् सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान् ।**
**मन्त्रज्ञान् कुलजाञ्शूरान् लब्धलक्षान् कुलोद्गतान् ॥** [17]

### ८. समकालिका प्रासङ्गिकता उपसंहारश्च:

उपसंहारे वक्तुं शक्यते यत्, अद्यतने आधुनिके राज्यविज्ञाने समाजशास्त्रे च वयं शक्तेः यस्य विकेन्द्रीकरणस्य (Decentralization of Power), शक्तिपृथक्कीकरणस्य, स्थानीयस्वायत्तशासनस्य च कथां वदामः–यत् आधुनिकभारतस्य संविधानस्य त्रिसप्ततितम-चतुःसप्ततितम-संशोधनाभ्यां (73rd & 74th Amendments) 'पञ्चायतीराज'-'नगरपालिका' व्यवस्थारूपेण रूपायितम् अस्ति–तस्य मूलं तात्त्विकं प्रायोगिकञ्च रूपरेखां सहस्रशः वर्षेभ्यः पूर्वमेव महर्षिमनुः स्वकीयसंहितायाम् अतीव सुचारु प्रज्ञापूर्वकञ्च अङ्कितवान् आसीत्। मनोः अस्याः स्थानीयस्वायत्तशासनव्यवस्थायाः पारमार्थिकी सार्थकता अस्याः स्वावलम्बने स्वाशासितसंरचनायाञ्च निहिता आसीत्। अनेन ग्रामीणसम्पदः ग्रामे एव सङ्गृहीताः प्रयुक्ताश्च भवन्ति स्म, न्यायव्यवस्थायाः स्थानीयकरणेन च ग्रामीणसमाजे शान्तिः, शृङ्खला, पारम्परिकं सौहार्दञ्च अक्षुण्णम् अतिष्ठत्।

प्राचीनभारतस्य अस्य जनकल्याणकामिनः, शोषणमुक्तस्य, सुशासितस्य च स्वायत्तशासनस्य परमं राजनैतिकं दर्शनं परवर्तिनि काले आचार्यकौटिल्यस्य अर्थशास्त्रस्य तस्मिन् अमरे वचने प्रतिफलितम् अभवत्, यत् वस्तुतः महर्षिमनोः दर्शनस्य एव एकं तात्त्विकम् अनुवर्तनम् अस्ति। कौटिलीयार्थशास्त्रस्य प्रथमाधिकरणस्य एकोनविंशतितमेऽध्याये राजप्रणिधिसन्दर्भे प्रजास्वार्थस्य राजस्वार्थस्य च एकात्मतां घोषयन् श्लोकोऽयं प्रदत्तः -

**प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।**
**नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्॥** [18]

अर्थात् प्रजानां सुखे एव राज्ञः वास्तविकं सुखं निहितम् अस्ति। प्रजानां कल्याणे एव राज्ञः कल्याणम् राज्ञः स्वकीयम् एकाकिनं किमपि प्रियं हितं वा न भवति। अपितु प्रजानां यद् प्रियं हितकरञ्च–तस्मिन्नेव राज्ञः वास्तविकः राजधर्मः हितञ्च तिष्ठति। अतः मनुसंहितायाः एषा स्वायत्तशासनव्यवस्था प्राचीनभारतस्य गौरवमयस्य राज्यचिन्तनस्य एकः शाश्वतः कालातीतः दस्तावेजः अस्ति, यः आधुनिकविश्वस्य विकेन्द्रीकरणनीतेः आलोकवर्तिका वर्तते।

---

[17] मनुस्मृतिः ७.५४

[18] कौटिलीयार्थशास्त्रम् अधिकरणम्-१ अध्यायः १९ श्लोकः ३४

यद्यपि आधुनिकं भारतीयसंविधानं पूर्णरूपेण धर्मनिरपेक्षं तथा समतायाः (Equality) सिद्धान्ते प्रतिष्ठितम् अस्ति यत् मनुस्मृतेः जन्मगतां सामाजिकस्तरीकरणव्यवस्थां निषेधति तथापि प्रशासनिकविकेन्द्रीकरणस्य, ग्रामीणस्वायत्तशासनस्य क्षेत्रीयस्तरे च एकस्य प्रबळशासकीयप्रतिनिधेः (Collector/DM) स्थापनायाः विषये मनुस्मृतेः साङ्गठनिकढांचायाः तथा आधुनिकभारतीयप्रशासनतन्त्रस्य संरचनायाः मध्ये कश्चन गभीरः ऐतिहासिकः तात्त्विकश्च सम्बन्धः अवश्यमेव वर्तते।

**Bibliography:**

**मूलग्रन्थाः**

१. कौटिलीयार्थशास्त्रम् (श्रीमन्माधवयज्वप्रणीता 'नयचन्द्रिका' टीका, भट्टस्वामिप्रणीता 'प्रतिपदपञ्चिका' टीका च सहिता) सम्पादकः - डॉ. उदयवीर शास्त्री, मेहरचन्द लछमनदास पब्लिकेशन्स, नई दिल्ली, प्रकाशन वर्ष - १९७०।
२. कौटिलीयार्थशास्त्रम् (आङ्ग्लभाषानुवाद-समीक्षात्मकटिप्पणी-सहितम्) सम्पादकः अनुवादकश्च - प्रो. आर. पी. काङ्गले, मोतीलाल बनारसीदास पब्लिशर्स, दिल्ली, संस्करणम् - १९६० (पुनर्मुद्रणम् - २०००)।
३. देवणभट्टः स्मृतिचन्द्रिका (संस्कारकाण्डः) सम्पादकः - एल. श्रीनिवासाचार्यः, राजकीय-प्राच्य-पुस्तकालयः (Government Oriental Library), मैसूरु, प्रकाशन वर्ष - १९१४।
४. देवणभट्टः स्मृतिचन्द्रिका (वेदव्यासवचनादि-स्मृतिसङ्ग्रह-सहिता) सम्पादकः - जे. आर. घरपुरे, कलेक्शन ऑफ हिन्दू लॉ टेक्स्ट्स, मुम्बई, प्रकाशन वर्ष - १९४६।
५. बृहस्पतिस्मृतिः (संस्कारकाण्डादि-प्राचीनपाठ-पुनरुद्धारित-संस्करणम्) सम्पादकः - प्रो. के. वी. रङ्गस्वामी आयङ्गर, गायकवाड़ ओरियण्टल सीरीज़, बडोदरा, प्रकाशन वर्ष - १९४१।
६. मनुस्मृतिः (कुल्लूकभट्टकृत-'मन्वर्थमुक्तावली'-टीकासहिता) सम्पादकः - जगदीशलाल शास्त्री, मोतीलाल बनारसीदास पब्लिशर्स, दिल्ली, संस्करणम् - १९८३।
७. मनुस्मृतिः (मेधातिथिप्रणीत-'मनुभाष्य'-सहिता), सम्पादकः - महामहोपाध्याय-डॉ.-गङ्गानाथ-झा, मोतीलाल बनारसीदास इण्टरनेशनल, दिल्ली, नवीन संस्करणम् - २०२३।
८. याज्ञवल्क्यस्मृतिः (विज्ञानेश्वरकृत-'मिताक्षरा'-टीकासहिता) सम्पादकः - उमेशचन्द्र पाण्डेयः चौखम्बा संस्कृत संस्थान, वाराणसी, संस्करणम् - २०१४।
९. वेदव्यासः महाभारतम् (शान्तिपर्व - राजधर्मपर्व, पाठसमीक्षितसंस्करणम्) प्रधान सम्पादकः - आचार्य विष्णु सीताराम सुकथणकर, भण्डारकर प्राच्य शोध संस्थान (BORI), पुणे, प्रकाशन वर्ष - १९५०।
१०. वेदव्यासः महाभारतम् (शान्तिपर्वणि राजधर्मानुशासनपर्व) नीलकण्ठकृत-'भारतभावदीप'-टीकासहितम्, गीताप्रेस, गोरखपुर, उत्तर प्रदेश, संस्करणम् - २०१२।

११. शुक्रनीतिसारः (महर्षिशुक्राचार्यप्रणीतः) सम्पादकः - ब्रह्मशङ्कर मिश्रः, चौखम्बा संस्कृत सीरीज़ ऑफिस, वाराणसी, प्रकाशन वर्ष - १९६८।

**आधुनिक-सहायकग्रन्थाः**

१२. आळतेकर, अनन्तसदाशिवः (A. S. Altekar) प्राचीनभारतीयशासनपद्धतिः, मोतीलाल बनारसीदास पब्लिशर्स, दिल्ली, प्रकाशन वर्ष - १९४८ (पुनर्मुद्रणम् - २०१६)।

१३. काणे, पाण्डुरङ्गवामनः (P. V. Kane); धर्मशास्त्र का इतिहास (प्राचीनराजधर्म-न्याय-व्यवस्था-विमर्शः), उत्तर प्रदेश हिन्दी संस्थान, लखनऊ, संस्करणम् - १९९२।

१४. घोसला, उपेन्द्रनाथः (U. N. Ghoshal); A History of Indian Political Ideas, ऑक्सफोर्ड यूनिवर्सिटी (Oxford University Press), नई दिल्ली, प्रकाशन वर्ष - १९५९।

१५. जायसवाल, काशीप्रसादः (K. P. Jayaswal); Hindu Polity: A Constitutional History of India in Hindu Times, चौखम्बा विद्याभवन, वाराणसी, प्रकाशन वर्ष - २००६।

१६. अनादिकुमारः महापात्र, भारतस्य शासनव्यवस्था राजनीतिश्च (आधुनिक-राजनीतिशास्त्रस्य विभिन्नधाराः पञ्चायतीराजव्यवस्था च) सुहृद् प्रकाशनम् (SUHRID PUBLICATION), कोलकाता, संस्करणम् - २०२१।

१७. Local Government in Ancient India (प्राचीनभारते जनपदमण्डलादि-स्थानीयशासनव्यवस्था), मोतीलाल बनारसीदास पब्लिशर्स, दिल्ली, प्रकाशन वर्ष - १९२० (पुनर्मुद्रणम् - २००३)।

१८. Aspects of Political Ideas and Institutions in Ancient India (प्राचीनभारते राजनैतिकविचाराः संस्थाश्च - पञ्चायतव्यवस्था-विमर्श-सहितम्), मोतीलाल बनारसीदास पब्लिशर्स, दिल्ली, प्रकाशन वर्ष - १९५९ (नवीन संस्करणम् - २०१५)।

CC BY NC